# Gurusevamahatmyam

# ગુરુસેવામાહાત્મ્યમ્

## Document Information

Text title : Gurusevamahatmyam

File name : gurusevAmAhAtmyam.itx

Category : deities_misc, brahmavaivartapurANa, gurudev, mAhAtmya

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | gaNapatikhaNDa | adhyAya 44/58-76||

Latest update : March 22, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2025

*sanskritdocuments.org*

# ગુરુસેવામાહાત્મ્યમ્

વિષ્ણુરુવાચ ।
શ્વેતદ્વીપાદાગતોઽહં જ્ઞાત્વા કોલાહલં ચ વઃ ।
અસ્ય રામસ્ય રક્ષાર્થં કૃષ્ણભક્તસ્ય સામ્પ્રતમ્ ॥ ૫૬॥

નૈતેષાં કૃષ્ણભક્તાનામશુભં વિદ્યતે ક્વચિત્ ।
રક્ષામિ તાંશ્ચક્રહસ્તો ગુરુમન્યં વિના શિવ ॥ ૫૭॥

નાહં પાતા ગુરૌ રુષ્ટે બલવદ્ગુરુહેલનમ્ ।
તત્પરઃ પાતકી નાસ્તિ સેવાહીનો ગુરોશ્ચ યઃ ॥ ૫૮॥

માન્યઃ પૂજ્યશ્ચ સર્વેભ્યઃ સર્વેષાં જનકો ભવેત્ ।
અહો યસ્ય પ્રસાદેન સર્વાન્પશ્યતિ માનવઃ ॥ ૫૯॥

જનકો જન્મદાનાચ્ચ પાલનાચ્ચ પિતા નૃણામ્ ।
તતો વિસ્તારકરણાત્કલયા સ પ્રજાપતિઃ ॥ ૬૦॥

પિતુઃ શતગુણં માતા પોષણાદ્ગર્ભધારણાત્ ।
વન્દ્યા પૂજ્યા ચ માન્યા ચ પ્રસૂસ્સ્યાદ્વૈ વસુન્ધરા ॥ ૬૧॥

માતુઃ શતગુણં વન્દ્યઃ પૂજ્યો માન્યોઽન્નદાયકઃ ।
યદ્વિના નશ્વરો દેહો વિષ્ણુશ્ચ કલયાઽન્નદઃ ॥ ૬૨॥

અન્નદાતુઃ શતગુણોઽભીષ્ટદેવઃ પરઃ સ્મૃતઃ ।
ગુરુસ્તસ્માચ્છતગુણો વિદ્યામન્ત્રપ્રદાયકઃ ॥ ૬૩॥

અજ્ઞાનતિમિરાચ્છન્નં જ્ઞાનદીપેન ચક્ષુષા ।
યઃ સર્વાર્થં દર્શયતિ તત્પરો નૈવ બાન્ધવઃ ॥ ૬૪॥

ગુરુદત્તેન મન્ત્રેણ તપસેષ્ટસુખં લભેત્ ।
સર્વજ્ઞત્વં સર્વસિદ્ધિં તત્પરો નૈવ બાન્ધવઃ ॥ ૬૫॥

સર્વં જયતિ સર્વત્ર વિદ્યયા ગુરુદત્તયા ।

તસ્માત્પૂજ્યો હિ જગતિ કો વા બન્ધુસ્તતોઽધિકઃ ॥ ૬૬॥

વિદ્યાન્ધો વા ધનાન્ધો વા યો મૂઢો ન ભજેદ્ગુરુમ્ ।
બ્રહ્મહત્યાદિભિઃ પાપૈઃ સ લિપ્તો નાત્ર સંશયઃ ॥ ૬૭॥

દરિદ્રં પતિતં ક્ષુદ્રં નરબુદ્ધ્યાઽઽચરેદ્ગુરુમ્ ।
તીર્થસ્નાતોઽપિ ન શુચિર્નાધિકારી ચ કર્મસુ ॥ ૬૮॥

પિતરં માતરં ભાર્યાં ગુરુપત્નીં ગુરું પરમ્ ।
યો ન પુષ્ણાતિ કાપટ્યાત્સ મહાપાતકી શિવ ॥ ૬૯॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુર્ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુરેવ પરં બ્રહ્મ ગુરુર્ભાસ્કરરૂપકઃ ॥ ૭૦॥

ગુરુશ્ચન્દ્રસ્તથેન્દ્રશ્ચ વાયુશ્ચ વરુણોઽનલઃ ।
સર્વરૂપો હિ ભગવાન્પરમાત્મા સ્વયં ગુરુઃ ॥ ૭૧॥

નાસ્તિ વેદાત્પરં શાસ્ત્રં ન હિ કૃષ્ણાત્પરઃ સુરઃ ।
નાસ્તિ ગઙ્ગાસમં તીર્થં ન પુષ્પં તુલસીદલાત્ ॥ ૭૨॥

નાસ્તિ ક્ષમાવતી ભૂમેઃ પુત્રાન્નાસ્ત્યપરઃ પ્રિયઃ ।
ન ચ દૈવાત્પરા શક્તિર્નૈકાદશ્યાઃ પરં વ્રતમ્ ॥ ૭૩॥

શાલગ્રામાત્પરો યન્ત્રો ન ક્ષેત્રં ભારતાત્પરમ્ ।
પરં પુણ્યસ્થલાનાં ચ પુણ્યં વૃન્દાવનં યથા ॥ ૭૪॥

મોક્ષદાનાં યથા કાશી વૈષ્ણવાનાં યથા શિવઃ ।
ન પાર્વત્યાઃ પરા સાધ્વી ન ગણેશાત્પરો વશી ॥ ૭૫॥

ન ચ વિદ્યાસમો બન્ધુર્નાસ્તિ કશ્ચિદ્ગુરોઃ પરઃ ।
વિદ્યાદાતુઃ પુત્રદારૌ તત્સમૌ નાત્ર સંશયઃ ॥ ૭૬॥

ગુરુસ્ત્રિયાં ચ પુત્રે ચાપ્યભવદ્રામહેલનમ્ ।
પરં સમ્માર્જનં કર્તુમાગતોઽહં તવાલયમ્ ॥ ૭૭॥

ઇતિ બ્રહ્મવૈવર્તપહરાણે ગણપતિખણ્ડે ચતુશ્ચત્વારિંશાધ્યાયાન્તર્ગતં
ગુરુસેવામાહાત્મ્યં સમાપ્તમ્ ।

બ્રહ્મવૈવર્તપુરાણ । ગણપતિખણ્ડ । અધ્યાય ૪૪/૫૮-૭૬॥

brahmavaivartapurANa . gaNapatikhaNDa . adhyAya 44/58-76..

Proofread by PSA Easwaran

*Gurusevamahatmyam*

pdf was typeset on March 22, 2025

Please send corrections to *sanskrit@cheerful.com*